## श्रीसुरसरस्वतीसभा, शृङ्गेरी

### प्रवेशपरीक्षा - प्रथमपत्रिका

दिनाङ्कः:- २८.०१.२०१८ पूर्वाह्णः १०.००तः १.०० पर्यन्तम्

समयः:- होरात्रयम् अङ्काः - १००

सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयुः

1. **अष्टानाम् एकवाक्येन उत्तरं लिखत।** 8

१. साक्षात्भगवान् विरूपाक्षः इव कः व्यराजत ?

२. देवव्रतस्य पिता कः ?

३. चन्द्रापीडं कः उपदिशति ?

४. सम्पदः कं वृणते ?

५. परशुरामस्य रथं के वाहायन्ते ?

६. किरातार्जुनीयस्य कथावस्तु कस्मात् सङ्गृहीतम् ?

७. गुरुवत् किं न उल्लङ्घनमर्हति ?

८. कौबेरीमाशां कः अङ्गीचकार ?

९. का अभिजातम् अहिमिव लङ्घयति ?

१०. दीपः इव अर्थदर्शनं कः कुरुते ?

११. लोप्त्रेण गृहीतस्य कुम्भीलकस्य किं प्रतिवचनं भवति ?

१२. "अयमसौ मम ज्यायान्" इति कः वदति? कः ज्यायान् ?

2. **षण्णां वाक्यद्वयेन उत्तरं लिखत।** 12

१. अनर्थपरम्परा का ?

२. समुद्रवेला कीदृशी वर्तते ?

३. शिशुकलहमाकर्ण्य के के तत्र समागताः ?

४. शिष्याचार्ययोः वृत्तिसारूप्यं भीष्मेण कथं व्याख्यातम् ?

५. गुरूपदेश: कथं वर्णित: ?

६. श्रीकण्ठो नाम जनपद: कीदृश: ?

७. कमलजदयितां प्रति प्रार्थिता: शुभफलदा: सम्पद: का: ?

८. मधुरापुरे हर: कथं विचचार ?

3. **त्रयाणां पञ्चषै: वाक्यै: संस्कृते उत्तरं लिखत।** 9

१. देवीकमलजदयिता कानि सदा दद्यात् इति श्रीचरणै: प्रार्थिता ?

२. शिवेन प्रकाशिता: प्रधानसिद्धय: का: ?

३. परशुरामस्य साङ्ग्रामिकोपकरणानि गङ्गादेव्या कथं वर्णितानि ?

४. जीमूतवाहनस्य त्यागबुद्धिं वर्णयत।

५. उर्वशीं भरतमहर्षि: कुत: अशपत् ?

4. **त्रयाणां ससन्दर्भं विवृणुत।** 9

१. "राजपुत्र्या: गतिं विधाय जनवादं परिहर।"

२. " वात्या शुष्कपत्रमपहरतीव।"

३. "अतिस्नेह: खलु कार्यदर्शी इति अभिधीयसे।"

४. " विधिहेतुरहेतुरागसां विनिपातोऽपि सम: समुन्नते:।"

५. "परार्थं बद्धकक्षाणां त्वादृशाम् उद्भव: कुत:। "

5. **एकस्य पद्यस्य सान्वयमर्थं लिखत।** 4

१. मतिमान् विनयप्रमाथिनस्समुपेक्षेत समुन्नतिं द्विष:।
सुजय: खलु तादृगन्तरे विपदन्ता ह्यविनीतसम्पद:॥

२. सर्वाशुचिविधानस्य कृतघ्नस्य विनाशिन:।
शरीरकस्यापि कृते मूढा: पापानि कुर्वते॥

6. श्लोकद्वयं पूरयत । 6

१. विद्यामुद्राक्षमाला--------------------- देहि मह्यम्॥

२. शुचि भूषयति --------------------- सिद्धिभूषण:॥

३. सच्चिद्रूपात्मनो ------------------------देहि मह्यम्॥

7. एकस्य कवे: देश-काल-कृति-वैशिष्ट्य-विषये लिखत। 4

१. भवभूति: २. भारवि:

8. चतुर्णां रूपाणि परिचाययत। 4

| | | |
|---|---|---|
| १. अगात् | २. चिकीर्षया | ३. तिरोदधे |
| ४. उन्मूलयितुम् | ५. त्राता | ६. विश्रान्त: |

9. चत्वारि पदानि संस्कृतवाक्येषु योजयत। 4

| | | |
|---|---|---|
| १. रुचियुतम् | २. दार्षद: | ३. मुदितमना: |
| ४. उपसान्त्वयितुम् | ५. अपवार्य | ६. वर्त्मनि |

10. चतुर्णां पर्यायपदं लिखत । 6

| | | |
|---|---|---|
| १. वाजी | २. आढ्य: | ३. वात्या |
| ४. द्विरद: | ५. कुम्भीलक: | ६. तुहिनम् |

11. चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत। 4

| | | |
|---|---|---|
| १. चञ्चच्चञ्चा | २. प्राणांस्तान् | ३. कस्त्राता |
| ४. पतङ्गस्योदये | ५. यन्निमित्तम् | ६. कलङ्कावतार: |

12. चतुर्णाम्  एकपदं लिखत । 4

१. मोक्षवाञ्छा

२. जरारहित:

३. दु:खेन अवाप्तुं योग्या

४. राज्ञां समूह:

५. कुबेरस्य इयम्

६. आप: गच्छन्ति इति

13. चतुर्णां  व्याकरणविशेषं लिखत । 8

१. वाङ्मनसे

२. जलनिधिमय:

३. भगवते रोचते

४. लोकमधितिष्ठति

५. अक्ष्णा काण:

६. अलमस्मै कर्मणे

14. चतुर्णां  विग्रहवाक्यानि विलिख्य समासनामानि लिखत। 8

१. बहुविधनुतिभि:

२. कमलजदयिता

३. धरणीभृत्

४. सहस्राक्ष:

५. अभानुभेद्यम्

६. सीमन्तितग्रहग्राम:

15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि  लिखत। 6

१. अब्रवीत्

२. लभेत

३. ददर्श

४. श्रृणोतु

५. दर्शयामास

६. अभूत्

16. चतुर्णां  रिक्तस्थानानि पूरयत। 4

१. शरदं लोक इव -----------।

२. स विवस्वानिव --------।

३. चन्दनप्रभवो न दहति किम् -------।

४. क्षत्रियपोतके पौरुषस्य -------।

५. जायन्ते च म्रियन्ते च मादृशा:  -------।

श्रीसुरसरस्वतीसभा, शृङ्गेरी

प्रवेशपरीक्षा - द्वितीयपत्रिका

दिनाङ्कः - २८.०१.२०१८ अपराह्णः १.३०तः ३.००पर्यन्तम्

समयः - सार्धैकहोरा अङ्काः ५०

सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयुः

1. विषयद्वयं सोदाहरणं विवृणुत। 10

१. प्रेरणार्थकक्रियापदानि

२. सन्नन्तधातुरूपाणि

३. छन्दसः भेदौ कौ ? दोधकस्य आर्यायाः च लक्षणं किम् ?

2. द्वौ सोदाहरणं विवृणुत। 8

१. अव्ययीभावसमासः

२. व्यतिरेकालङ्कारः

३. रथोद्धता-छन्दः

3. त्रयाणां रूपाणि पुरुषवचनत्रये लिखत। 9

| | | |
|---|---|---|
| १. जह्यात् | २. आप | ३. ममे |
| ४. उवाच | ५. क्रीणाति | ६. श्रोष्यति |

4. चतुर्णाम् अन्यलिङ्गरूपाणि लिखत। 4

| | | |
|---|---|---|
| १. कुर्वन् | २. दातव्यम् | ३. दधाना |
| ४. विक्रेता | ५. यामकः | ६. चिकीर्षुः |

5. द्वयो : प्रयोगं व्यत्यस्यत। 3

१. असौ अतिदुष्करं कर्म करोति।

२. वत्स ! त्वं मां परिष्वजस्व।

३. कविः बाणभट्टः कादम्बरीं व्यरचयत्।

४. रघुः कौत्सात् पुत्ररूपं वरं लेभे।

6. त्रयाणां विग्रहवाक्यं कृत्वा समासनाम लिखत। 6

| | | |
|---|---|---|
| १. वाक्सवित्री | २. ललाटन्तपः | ३. यथाशक्ति |
| ४. गुरुदक्षिणा | ५. विद्याधनम् | ६. त्रिलोकी |

7. मातृभाषया अनुवदत । 5

१. न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायतां यान्ति।

२. किं ते अभीष्टं प्रदद्यां शीघ्रं ब्रूहि।

३. पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि।

४. समुद्रः तरङ्गाग्रैः फेनचन्दनं पिनष्टीव।

५. वयस्य! अहं बहूनि उत्तमानि क्षौमवस्त्राणि अक्रीणि।

8. संस्कृतभाषायाम् अनुवदत । 5

1. Just at a sight sadhus make sinners pure. (पवित्र)
2. King should appoint brave soldiers.
3. O! Jagannayaka! We cannot see your glory by our physical eyes.
4. Cowherds milked the milk from cows.
5. On the bank of the river Malini, Dushyantha went to Kanvamaharshi's Ashram.

--------